National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2015; 1(1): 85-87
© 2015 NJHSR
www.sanskritarticle.com

**आचार्यः जि. पद्मनाभम्**
संस्कृतविभागः,
श्रीवेङ्कटेश्वरविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

**Correspondence:**
**आचार्यः जि. पद्मनाभम्**
संस्कृतविभागः,
श्रीवेङ्कटेश्वरविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

# भागवतधर्माः

**आचार्यः जि. पद्मनाभम्**

**सारांशः -** अस्मिन् लेखे श्रीमद्भागवतपुराणस्य एकादशस्कन्धं तथा भगवद्गीतायाः द्वादशाध्यायं च आधारं कृत्वा **भागवतधर्मस्य** सुदीर्घा विवेचना कृता अस्ति। लेखस्य आरम्भे विदेहराजस्य **निमि**महोदयस्य नवयोगेश्वरैः सह संवादः वर्णितः, यत्र सः क्षणभङ्गुरं मानुषदेहं ज्ञात्वा परमश्रेयसः उपायं पृच्छति। **कविः** नाम योगेश्वरः भागवतधर्मं निरूपयन् कथयति यत् मनुष्यः स्वभावात् कायेन, वाचा, मनसा, बुद्ध्या वा यत् किमपि कर्म करोति, तत् सर्वं **नारायणाय समर्पयेत्**। भगवतः गुणानां श्रवणं, नामकीर्तनं तथा लोकलज्जां त्यक्त्वा तन्मयतया नर्तनम् एव मुख्यः भागवतधर्मः अस्ति।
लेखे भक्तानां त्रयः भेदाः दर्शिताः सन्ति— **उत्तमः, मध्यमः, प्राकृतश्च**। उत्तमः भक्तः सः यः सर्वभूतेषु भगवन्तं पश्यति। मध्यमः भक्तः ईश्वरे प्रेम, भक्तेषु मैत्रीं च करोति। प्राकृतः भक्तः केवलं प्रतिमायां पूजां करोति परन्तु भक्तेषु तस्य प्रीतिः न भवति। गीतायाः **भक्तियोगस्य** सन्दर्भे अपि अद्वेष्टा, अक ारुण ्यः, हर्ष-शोक-मुक्तः च भक्तः एव भगवतः प्रियः इति सिद्धम्। निष्कर्षतः, एतेषां धर्माणां पालनेन एव मनुष्यः परमां शान्तिं मोक्षं च लब्धुं शक्नोति।
***कूटशब्दाः –भागवतधर्मः, नवयोगेश्वराः, नारायणार्पणम्, क्षणभङ्गुरत्वम्, शरणागतिः, भक्तियोगः, उत्तमभागवतः, मध्यमभागवतः, प्राकृतभक्तः, आत्मनिवेदनम् ।***

भागवतं साक्षात् भगवतः स्वरूपमस्ति। तस्मादेव भक्ताः भगवद्भावनया श्रद्धया च भागवतं पूजयन्ति, आराधयन्ति च। भगवतः मधुरतमभक्तिरसस्य सार एव भागवतम्। भागवतपारायणेन समस्तलौकिकपारलौकिकसिद्धयः प्राप्यन्ते। भारतीयानां असन्ताराधनीयग्रन्थराजेस्मिन् भागवते भागवत- धर्मानुद्दिश्य एकादश स्कन्धे शुकमहर्षिः परीक्षिन्महाराजं एवं उक्तवान् ।
हे राजन् ! श्रीकृष्णस्य सान्निध्ये कतिचन दिनानि यापनीयानीति नारदस्य अभिलाषा आसीत्। तदनुसारेण एकदा नारदः वसुदेवस्य सन्निधिं प्राप्तवान्। वसुदेवः नारदं भक्त्या पूजयित्वा जननमरणरूपभयङ्करसंसारं अनायासेन तरुणोपायं उपदिशतु इति नारदं प्रार्थयामास। तदा नारदः एवमवोचत्।
भारतदेशे निमि इति नामकः विदेह राजः आसीत्। सः महद्भिः ऋषिभिः एकं महत् यज्ञं कारयामास । ऋषभस्य पुत्राः नव संख्याकाः तद्यज्ञाय आजग्मुः। राजा निमिः तान् सत्कृत्य इदं पप्रच्छ।

**दुर्लभो मानुषो देहो देहिनां क्षणभङ्गुरः ।**
**तत्रापि दुर्लभं मन्ये वैकुण्ठप्रियदर्शनम् ।।**
**धर्मान् भागवतान् ब्रूत यदि नः श्रुतये क्षमम् ।**
**यैः प्रसन्नः प्रपन्नाय दास्यत्यात्मानमप्यजः ॥**[1]

हे योगीश्वराः ! क्षणभङ्गरं नरजन्मातत् जन्तूनां दुर्लभं भवति। लब्धमपि प्रतिक्षणं मृत्युभयं भवत्येव । अनिश्चिते मानवजीविते साधुमहात्मनां भक्तानां च दर्शनं इतोऽपि दुर्लभं भवति। तस्मात् परमश्रेयोदायकं किम् ? तस्य स्वरूपं किम्? तत्प्राप्तिसाधनं किम् ? इत्यादीन् भागवत धर्मान् महां कृपया उपदिशन्तु

भवन्तः।

निमेः वचनानि श्रुत्वा नवसु योगीश्वरेषु प्रथमः 'कविः' एवमवोचत्।

**मन्येऽकुतश्चिद्भयमच्युतस्य**
**पादाम्बुजोपासनमत्र नित्यम्।**
**उद्विग्नबुद्धेरसदात्मभावाद्**
**विश्वात्मना यत्र निवर्तते भीः ।।**[2]

अर्थात् भक्तानां हृदयस्थस्य भगवतः अच्युतस्य निरन्तरपादोपासनमेव परम श्रेयं सर्वदा भयशून्यमिति मम निश्चिताभिप्रायः। अज्ञानिनां भगवत् प्राप्तेः ये सुलभोपायः सन्ति ते एव भागवत धर्माः इति जानीहि।

**भागवतधर्मा :-**

**कायेन वाचा मनसेन्द्रियैर्वा**
**बुद्ध्यात्मना वानुसृतस्वभावात्।**
**करोति यद्यत् सकलं परस्मै**
**नारायणायेति समर्पयेत् ।।**[3]

यः शरीरेण मनसा वाचा इन्द्रियैर्वा बुद्ध्या अहंकारेण वा स्वभावात् यत् करोति तत् सर्व परमपुरुषाय नारायणाय समर्पयेत् सः भागवत धर्मः।

**श्रृण्वन् सुभद्राणि रथाङ्गपाणे-**
**र्जन्मानि कर्माणि च यानि लोके।**
**गीतानि नामानि तदर्थकानि**
**गायन् विलज्जो विचरेदसङ्गः ।।**[4]

भगवतः जन्मनः लीलानाञ्च सम्बन्धिनः नैकाः पवित्रकथाः सुप्रसिद्धाः सन्ति। तासां श्रवणमावश्यकम्। तेषां गुणानां लीलानां च स्मरणरूपाणि भगवन्नामानि च नैकानि सन्ति। विना संकोचं तेषां गीतानां नामानां च गायतः मनुष्यस्य धर्मः अपि भागवत धर्मो भवति।

**एवंव्रतः स्वप्रियनामकीर्त्या**
**जातानुरागो द्रुतचित्त उच्चैः।**
**हसत्यथो रोदिति रौति गाय-**
**त्युन्मादवन्नृत्यति लोकबाह्यः ।।**[5]

एवं विधव्रतः भक्तः स्व प्रियदेवनामकीर्तनेन तस्मिन् परब्रह्मणि जातानुरागः आर्द्रचित्तश्च भवति। अपि च सः स्वभावतः दैवोन्मत्ती भूत्वा कदाचित् हसति, कदाचित् देवाय परितप्यते, जातु सः उच्चैः भगवन्तं रौति, कदाचित् मधुर स्वरेण देवगुण गानं करोति, लोकबाह्यो भूत्वा भगवत् सन्निधौ नृत्यति च।

अपि च पृथिव्यप्तेजोवायुव्याकाशाः पञ्चमहाभूतानि चन्द्रसूर्यादिग्रहाश्च नक्षत्राणि, दश दिशः वृक्षादयः, सरितः समुद्राश्च हरेः शरीरं भवन्ति। सर्वेषु रूपेषु भगवान् प्रत्यक्षो भवति। तस्मात् भगवन्तं उपर्युक्त भूतंमत्वा भक्तः यत्किञ्चिदपि वस्तु प्राणिनं वा अनन्यया भक्त्या नमस्करोति।

एवं प्रकारेण यः सततं एकैकवृत्तिद्वारा भगवत् पादसेवां करोति, तस्य भगवति भक्तिः समाजे वैराग्यं भगवतः स्वरूप स्पूर्तिश्च अवश्यं गोचराः भवन्ति, तदा सः भागवतो भवति। ते स्वयं परम शान्तिं च अनुभवन्ति। एतत् श्रुत्वा राजा निमिः एवं पप्रच्छ।

**भागवतलक्षणानि :-**

**अथ भागवतं ब्रूत यद्धर्मो यादृशो नृणाम्।**
**यथा चरति यद्ब्रूते यैर्लिङ्गैर्भगवत्प्रियः ।।**[6]

हे योगिपुङ्गव ! भगवद्भक्तस्य लक्षणानि कृपया कथय भगवत् भक्तस्य धर्माः के? तस्य स्वभावः कीदृशः? मनुजैः व्यवहारसमये सः यथा आचरति, किं बूते, कैः लक्षणैः सः. भगत् प्रियो भवति। निमेः प्रश्नान् उत्तरयन् हरिः इत्याख्यः योगीश्वरः एवं कथयति।

**उत्तमभागवतः**

**सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः।**
**भूतानि भागवत्यात्मन्येष भागवतोत्तमः ।।**[7]

अर्थात् - आत्मस्वरूपो भगवान् समस्त प्राणिषु आत्मरूपेण नियन्तरूपेण च अस्ति। यः यत्रापि न्यूनत्वं वा आधिक्यं वा अदृष्ट्वा परिपूर्णभगवत्सत्तामेव पश्यति सः उत्तम भागवतः। अपिच -

**गृहीत्वापीन्द्रियैरर्थान् यो न द्वेष्टि न हृष्यति।**
**विष्णोर्मायामिदं पश्यन् स वै भागवतोत्तमः ।।**[8]

नेत्रादी इन्द्रियैः शब्दादि विषयान् गहीत्वापि प्रतिकूलविषयेषु द्वेषं वा, अनुकूल विषयेषु हर्ष वा अप्राप्तः भक्तः सर्वं विष्णोर्मायां पश्यति सः भागवतोत्तमः।

संस्कृतभागवतानश्रीकरण कर्ता महाकवि पोतनामात्योपि स्वकीये भागवते भङ्ग्यन्तरेण सुधाम् नामकस्य भागवतस्य मुखारविन्दात् भागवत लक्षणं एवं कथयामास।

**नीपादकमलसेवयु नीपादार्चकुलतोडि नेच्यमुनु।**
**नितान्ता पारभूतदययुनु तापसमन्दार माकु दयसेयगदे ।।**

अत्र भगवत् पादकमल सेवा, भगवद्भक्तैस्सह सख्यता अपार भूतदया च इत्येतानि त्रीणि उत्तम भागवत लक्षणानीति स्पष्टीकृतम्।

अमुमेव विषयं श्रीमद्भगवद्गीतायां भक्तियोग नामके द्वादशोध्याये नरोत्तमः

अर्जुनः भगवन्तं श्रीकृष्णं पृच्छति। तदा श्रीकृष्णः एवं उवाच।

**मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते।**
**श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ।।**[9]

परमेश्वरे मयि एकाग्रचित्ताः, सततं मद्भजनध्यानादिषु निमग्राः परया श्रद्धेयोपेताश्च ये भक्ताः भवन्ति, ते योगिषु परमश्रेष्ठाः भवन्ति।

**उद्वेष्टा सर्वभूतानां मैत्रः करुण एव च।**
**निर्ममो निरहंकारस्समदुःखसुखः क्षमी ।।**

**सन्तुष्टस्सततं योगी यतात्मा दृढनिश्चयः ।**
**मय्यर्पितमनोबुद्धिर्यो मद्भक्तस्स मे प्रियः ।।**[10]

यः सर्वप्राणिनां अद्वेष्टा, सर्वभूतेषु मैत्रीभावसम्पन्नः कारुण्यवान्, ममताहङ्काररहितः, सुख दुःखयोः समभावनापरः, क्षमागुणवान् सर्वकालसर्वावस्थासु सन्तुष्टो योगी, विजितेन्द्रियः स्था दृढनिश्चयः मय्यर्पित मनोबुद्धिश्च भवति स मे प्रिय भक्तः भवति।
अपि च तत्रैव गीतायाम् -

**यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।**
**हर्षामर्षभयोद्वेगैः मुक्तो यस्स च मे प्रियः ।।**[11]

लोके यः न कमपि क्षोभयति अपि च येन केनापि स्वयं न क्षुभ्यते। हर्षेर्ष्या भयोद्वेगादीन् विकारान् न प्राप्नोति स मे प्रियभक्तः ।

**यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।**
**शुभाशुभ परित्यागी भक्तिमान्यस्स मे प्रियः ।।**[12]

यः सन्तोष विषयेषु हर्षं न प्राप्नोति, अनिष्ठविषयान् न द्वेष्टि, अशुभस्य विषये न शोचति, वत्स्वादीन् न कांक्षति, शुभाशुभपरित्यागी च भवति सः मे प्रियः भक्तिमान् भवति ।
अपि च-

यः देहेन्द्रियप्राणमनोधियां जननमरणक्षुद्भयतृष्णाभिः संसारधर्मः हरेः स्मरणेन अभिमुह्यमानो भवति सः प्रधानः भागवतः भवति। यस्य मनसि विषयवाञ्छा कर्मप्रवृत्तिः न भवति केवलं भगवति वासुदेवे एव निवसति सः उत्तम भक्तः ।

यस्य अस्मिन् शरीरे जन्म कर्माभ्यां वर्णाश्रमजातिभिश्च अहंभावैः न सज्जते सः हरेः प्रियः भवति। यस्य धनेषु आत्मनीव स्वर पर इति भेदभावो नास्ति सर्वभूत समः शान्तश्च भवति सः उत्तमः भक्तः ।

**त्रिभुवनविभवहेतवेऽप्यकुण्ठ-**
**स्मृतिरजितात्मसुरादिभिर्विमृग्यात् ।**
**न चलति भगवत्पादारविन्दात्**
**लवनिमिषार्धमपि यः स वैष्णवाग्र्यः ॥**

सुरादयः स्वान्तःकरणं भगवन्मयं कुर्वन्तः यौ अन्वेषयन्ति ताभ्यां पादकमलाभ्या यः निमेषार्धमपि न चलत्ति, तत्पादसन्निधावेव संलग्नश्च भवति सः वैष्णवाग्रत्र्यः भक्तः भवति। भगवन्नामोच्चारणमात्रेण समस्तपापनाशको भगवान् श्रीहरिः यस्य हृदये क्षणकालमपि अत्यजन् अस्ति, यः भक्तिपाशेन भगवत्पादपद्मे बध्नाति सः भगवत् भक्तेषु प्रधानः ।

एवं उत्तम भागवत लक्षणं भागवते श्रीमद् भगवद्गीतायां च उक्तम्। द्वयोः ग्रन्थयोः उत्तमभागवत लक्षणं समानमेवास्ति ।

**मध्यमभागवतः**

**ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च ।**
**प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः ।।**[13]

भगवद् भक्तिः, भगवद् भक्तैः मित्रत्वं, दुःखितेषु अज्ञानेषु च कारुण्यं, भगवद् द्विषत्सु उपेक्षा च यस्य भवति सः मध्यम भागवतः भवति। यद्यपि अस्मिन् उत्तमभागवतलक्षणानि सन्ति तथापि भगवद्विषयेषु उपेक्षा भावः वर्तमानत्वात् उत्तमभागवतात् मध्यमभागवतः किञ्चित् न्यूनः इति वक्तुं शक्यते ।

अयमेवाभिप्रायः महाकविकालिदासेन स्वकुमारसम्भवनामके काव्ये पञ्चमसर्गे पार्वतीब्रह्मचारिणोः संवादक्रमे उच्यते । यथा -

**न केवलं यो महतोऽपभाषते**
**श्रृणोति तस्मादपि यः स पापभाक् ।**[14]

यः पूज्यान् निन्दाति न केवलं स एव पापात्मा, किन्तु यः स्वयं तानि वाक्यानि श्रृणोति सोऽपि पापात्मा भवति।

**प्राकृतभागवतः**

**अर्चायामेव हरये पूजां यः श्रद्धयेहते ।**
**न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः ।।**[15]

यः भगवतः मूर्त्यादीन् श्रद्धया पूजयति, किन्तु भगवद्भक्तेभ्यः इतरेभ्यश्च विशेषेण सेवाशुश्रूषादीन् न करोति सः सामान्यभगवद्भक्तः भवति ।

उपर्युक्तेषु त्रिविधेषु भागवतलक्षणेषु उत्तमभागवतलक्षणम् अस्माकम् अत्यन्तावश्यकम् आचरणीयं च भवति। यदि मानवः उत्तमभागवतधर्मम् आचारति सः स्वजन्म सार्थकं करोति, परमां शान्तिं च प्राप्नोति । मोक्षं च लभते ।


**उपयुक्त ग्रन्थावली**

**१. श्रीमद्भागवत महापुराणम्,** गीता प्रेस्, गोरख् पूर।

**२. श्रीमद् भगवद्गीता,** गीता प्रेस्, गोरख् पूर ।

**३. कुमारसम्भवम्,** इण्डोलाजिकल बुक् हउस्, वारणासी।

**४. पोतन भागवतमु,** तिरुमल तिरुपति देवस्थानम्, तिरुपति।

**५. भागवतरत्नाकरम्,** शुकब्रह्माश्रमम्, श्रीकालहस्ति।


**पाद टिप्पणीः**

1 श्रीमद्भगवद्गीता – ११/२/३०-३१
2 श्रीमद्भागवतमहापुराणम् – ११/२/३३
3 तत्रैव – ११/२/३६
4 तत्रैव – ११/२/३९
5 तत्रैव – ११/२/४०
6 तत्रैव – ११/२/४४
7 तत्रैव – ११/२/४५
8 तत्रैव – ११/२/४८
9 श्रीमद्भगवद्गीता – १२/२
10 तत्रैव – १२/१३-१४
11 तत्रैव – १२/१५
12 तत्रैव – १२/१७
13 तत्रैव – ११/२/४६
14 कुमारसम्भवम् – ५/८३
15 श्रीमद्भागवतमहापुराणम् – ११/२/४७